# श्री कृष्ण कृत दुर्गा स्तोत्रं

## श्रीकृष्ण उवाच

त्वमेव सर्वजननी मूलप्रकृति रीश्वरी |
त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका || १ ||

कार्यार्थे सगुणा त्वं च वस्तुतो निर्गुणा स्वयम् |
परब्रह्म स्वरूपा त्वं सत्या नित्या सनातनी || २ ||

तेज: स्वरूपा परमा भक्तानुग्रह विग्रहा |
सर्वस्वरूपा सर्वेशा सर्वाधारा परात्परा || ३ ||

सर्वबीज स्वरूपा च सर्वपूज्या निराश्रया |
सर्वज्ञा सर्वतोभद्रा सर्वमङ्गल मङ्गला || ४ ||

सर्वबुद्धि स्वरूपा च सर्वशक्ति स्वरूपिणी |
सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी || ५ ||

त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम् |
दक्षिणा सर्वदाने च सर्वशक्ति स्वरूपिणी || ६ ||

निद्रा त्वं च दया त्वं च तृष्णा त्वं चात्मन: प्रिया |
क्षुत्क्षान्ति: शान्तिरीशा च कान्ति: सृष्टिश्च शाश्वती || ७ ||

श्रद्धा पुष्टिश्च तन्द्रा च लज्जा शोभा दया तथा |
सतां सम्पत्स्वरूपा श्रीर्विपत्तिरसतामिह || ८ ||

प्रीतिरूपा पुण्यवतां पापिनां कलहाङ्कुरा |
शश्वत्कर्ममयी शक्ति : सर्वदा सर्वजीविनाम् || ९ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

देवेभ्य: स्वपदो दात्री धातुर्धात्री कृपामयी |
हिताय सर्वदेवानां सर्वासुरविनाशिनी || १० ||

योगनिद्रा योगरूपा योगदात्री च योगिनाम् |
सिद्धिस्वरूपा सिद्धानां सिद्धिदाता सिद्धियोगिनी || ११ ||

माहेश्वरी च ब्रह्माणी विष्णुमाया च वैष्णवी |
भद्रदा भद्रकाली च सर्वलोकभयंकरी || १२ ||

ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे |
सतां कीर्ति: प्रतिष्ठा च निन्दा त्वमसतां सदा || १३ ||

महायुद्धे महामारी दुष्टसंहार रूपिणी |
रक्षास्वरूपा शिष्टानां मातेव हितकारिणी || १४ ||

वन्द्या पूज्या स्तुता त्वं च ब्रह्मादीनां च सर्वदा |
ब्राह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम् || १५ ||

विद्या विद्यावतां त्वं च बुद्धि र्बुद्धिमतां सताम् |
मेधास्मृति स्वरूपा च प्रतिभा प्रतिभावताम् || १६ ||

राज्ञां प्रतापरूपा च विशां वाणिज्य रूपिणी |
सृष्टौ सृष्टिस्वरूपा त्वं रक्षारूपा च पालने || १७ ||

तथान्ते त्वं महामारी विश्वस्य विश्वपूजिते |
कालरात्रि र्महारात्रि र्मोहरात्रि श्च मोहिनी || १८ ||

दुरत्यया मे माया त्वं यया सम्मोहितं जगत् |
यया मुग्धो हि विद्वांश्च मोक्षमार्ग न पश्यति || १९ ||






With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

इत्यात्मना कृतं स्तोत्रं दुर्गाया दुर्गनाशनम् |
पूजाकाले पठेद् यो हि सिद्धि र्भवति वाञ्छिता || २० ||

वन्ध्या च काकवन्ध्या च मृतवत्सा च दुर्भगा |
श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम् || २१ ||

कारागारे महाघोरे यो बद्धो दृढबन्धने |
श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम् || २२ ||

यक्ष्मग्रस्तो गलत्कुष्ठी महाशूली महाज्वरी |
श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात् प्रमुच्यते || २३ ||

पुत्रभेदे प्रजाभेदे पत्नीभेदे च दुर्गतः |
श्रुत्वा स्तोत्रं मासमेकं लभते नात्र संशयः || २४ ||

राजद्वारे श्मशाने च महारण्ये रणस्थले |
हिंस्त्रजन्तु समीपे च श्रुत्वा स्तोत्रं प्रमुच्यते || २५ ||

गृहदाहे च दावाग्नै दस्युसैन्य समन्विते |
स्तोत्र श्रवण मात्रेण लभते नात्र संशयः || २६ ||

महादरिद्रो मूर्खश्च वर्ष स्तोत्रं पठेत्तु यः |
विद्यावान धनवां श्चैव स भवेन्नात्र संशयः || २७ ||

**इति श्री कृष्ण कृत दुर्गा स्तोत्रं सम्पूर्ण**

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133